संस्कृत. ...ढीवर.

संन्यास.

क्र. १

श्री अच्युताश्रमस्य न्यास पद्धती.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

।। ।।अथश्रीअच्युताश्रमसन्यासपद्धतीपुस्तक प्रारंभः।। ।।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥१॥ ॥ श्रीगणेशाय नमः ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ यद्वाक्यतः
परं ब्रह्म ज्ञातोहं तत्क्षणादिह ॥ तं वंदे यतिधर्मज्ञं चिदानंदाश्रमं गुरुं ॥१॥
(2) श्रीरामं परमानंदं स्वरूपं शिष्यसेवधिं ॥ चिदानंदाश्रमं नत्वा वक्ष्येह
मच्युताश्रमः ॥२॥ सर्वसंन्यासिनां धर्मसंग्रहं ऋषिभाषितं ॥ तत्रादौ
सर्वसंन्यासकरणे विधिरुच्यते ॥ कृछ्रान्स्तु चतुरः कृत्वा पावनार्थं मना
श्रमी ॥३॥ आश्रमी चेत्तस्य कृछ्रं तेनासौ योग्यतां व्रजेत् ॥४॥ कृछ्रलक्षणमाह ॥
एकभुक्तेन नक्तेन तथैवायाचितेन न ॥ एकेनैवोपवासेन पादकृछ्र उदा
हृतः ॥५॥ एवं त्रिगुणितः कृत्वा प्राजापत्योयमुच्यते ॥ एकभक्तादिषु पं ॥१॥
चविंशति ग्राससंख्यानियमस्तु केचन वदंति ॥६॥ तस्य कृछ्रमाह ॥

(2A)

याज्ञवल्क्यः ॥ उष्णोदकं तु त्रिपलं द्विपलं तु पयः पिबेत् ॥ पलमेकं सर्पिरिति
क्रमेण ज्ञातव्यमिति ॥ ७ ॥ तत्सक्षीरं च तांबूलं नामेकैकशस्सहं पिबेत् ॥ एक
रात्रोपवासश्रांतस्त्वरूप उदाहृतः ॥ ८ ॥ संन्यासे नधिकारिणमाह ॥ अ
नपाकृतमोक्षं तु सेव्यमानो व्रजेत्स्वयं ॥ चरणान्नृत्रिण्यपाकृत्य मनो मो
क्षे निवेशयेत् ॥ आरूढपतीतापत्यं कुनखी श्यावदंतकाः ॥ क्षयक्षीणांग
विकलो न तु संन्यासमर्हति ॥ ९ ॥ यमः ॥ व्रतयज्ञतपोदानहोमस्वाध्यायव
र्जितं ॥ शौचा चारपरिभ्रष्टं संन्यासं नैव कारयेत् ॥ ११ ॥ अग्निहोत्रं गवालं
भं संन्यासं पलपैतृकं ॥ देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेत् ॥ १२ ॥ देव
लः ॥ यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्त्तते ॥ तावन्न्यासाग्निहोत्रादिक
र्तव्यं तु कलौ युगे ॥ १३ ॥ संन्यासे अधिकारिणः ॥ यदा सर्वपदार्थेषु वै
४x संगस्सवसितानां च माहापातकिनामपि ॥ ज्ञासानामभिशस्तानां सैं नैव कारयेत्
न्यासं

यते तत्+

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

२ राग्यं यस्य जायते॥ अधिकारी सविज्ञेय इति शातातपो ब्रवीत्॥१४॥
विधिवद्बुद्धये वैदान्पुत्रांश्चोत्साद्य धर्मतः॥ इष्ट्वा च शक्तितो यज्ञै
(3) र्मनो मोक्षे निवेशयेत्॥१५॥ यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रु
तेः॥ तस्माद्विरक्त एवाधिकारिणेति॥ मलमासबृहस्पतिशुक्रअस्त
समन्वितः॥ दक्षिणायनवर्तित्ते संन्यासं नैव कारयेत्॥ ॥अथ सं
न्यासविधिं व्याख्यास्यामः॥ पूर्वेद्युर्नांदीश्राद्धं कुर्यात्॥ दैवं चार्षं
तथा दिव्यं पितृमातृच मानुषं॥ भौतिकं चात्मनश्चांतेऽष्टौश्राद्धानि २
निर्वपेत्॥ सर्वत्र नांदीमुखे वृद्धिश्राद्धकालः॥ ॥अथ श्राद्धद्रव्या
णि॥ यवदूर्वाक्षतादधिघृतमधुलाजाप्रभृतीनि सुमंगलान्यन्या
नि नांदीमुखं वृद्धिकृतश्राद्धं समानं कार्यं॥१६॥ प्रथमं वैश्वदेवं कृत्वा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

निस्वसंबंधीनि विश्वोः यूजां विधायवस्यसम्स्येति विसृज्य॥ सर्वश्राद्धे
षुश्राद्धलक्षणमुत्तमं॥ सत्यवसुविश्वेदेवाः सर्वंवृद्धिश्राद्धवत्कुर्यात्॥ ॥
अथश्राद्धक्रमः॥ प्रथमेदेवश्राद्धेदेवतात्रयं ब्रह्मविष्णुमहेश्वराः॥ द्वि
तीयेऋषिश्राद्धदेवतात्रयं॥ ब्रह्मर्षिक्षत्रर्षिदेवर्षयः॥ तृतीये
दिव्यश्राद्धेदेवतात्रयं वसुरुद्रादित्याः॥ चतुर्थेमनुष्यश्राद्धेदेवता
त्रयंसनकसनंदनसनातनाः॥ ब्रह्मपाःसुताः॥ पंचमेभूतश्राद्धेदे
वतात्रयं॥ पृथिव्यादीनिपंचमहाभूतानिएकादशाचक्षुरादीनिइं
द्रियाणिचतुर्विंशतिग्रामाः॥ षष्ठेपितृश्राद्धेदेवतात्रयंपितृपिता
महप्रपितामहाः॥ सप्तमेमातृश्राद्धेदेवतात्रयं॥ मातृपितामहीप्र

पितामहार्थं भवतः ॥ अष्टमे आत्मश्राद्धे आत्मा अंतरात्मा परमात्मा
३ र्थे एवं सर्वत्र युग्मो ब्राह्मणो वृद्धिश्राद्धवत् सर्वं कर्त्तव्यं ॥ विनायको
(५) पनयनादिवत् ॥ स्मृतिश्राद्धे पिंडत्रयं कुर्यात् ॥ द्वयं चेति केचिन्म
तं द्वितीयं तत्पक्षे अपरे स्तु उपनासादि कर्त्तव्यं व्यग्रतास्ति चेत्तस्मिन्ने
व दिने कर्मसमाप्तिपर्यंतं शिखार्थं सप्ताष्ट केशान् स्थापयेत् ॥ आ
दावंते च पुण्याहवाचनं पादप्रक्षालनाचमनप्राणायामः ॥ अद्येत्या
दि प्रयोगं विधाय स्वस्ति वाच्य स्वस्ति नो मिमीता इति ॥ तथा शांति
पाठः ॥ अद्येत्यादि अशेषदुःखनिवृत्तिनिरतिशयानंदप्राप्ति ३
परमपुरुषार्थप्राप्तये परमहंससंन्यासस्वीकारार्थं श्राद्धान्यहं
करिष्ये ॥ ॐ कुरुष्व संन्यासमिति ब्रूत द्विजोत्तमाः ॥ अनुज्ञाप्रा

(6A)

प्य युष्माकं सिद्धिं यास्यामि त्राणभ्यतां ॥ गर्भवासभयाद्भीतं तापत्र
यात्तथैव च ॥ गृहीत्वा विष्णुमिच्छामि परं पदमनामयं ॥ इति प्रार्थनानं
तरं श्राद्धानि कुर्यात् ॥ श्राद्धानंतरं तस्मिन्दिने द्वितीये वा क्षौरार्थं
पंचषट्केशान्स्थापवर्जयित्वा मुखे केशश्मश्रुलोमादीनां कक्षो
पस्थवर्जं वपनं विधाय नखानि निकृत्य यथासंभवं स्नानं विधाय कौपि
नाच्छादनाद्युपयुक्तं स्यात्तेन ततः आचार्याय दक्षिणार्थं संभवं स्नानं हो
मद्रव्यं च पृथक्कृत्वा चैतैः संतर्प्य सर्वभोगधनं सन्यासदातृभ्यो निवे
द्य तदाज्ञया सर्वमार्थिभ्यो दद्यात् ॥ असति विभवे स्वात्मानमेव केवलं
तस्मै निवेदयेत् ॥ अथ देवतायतने ग्रामे वा नदीपुलिने गोष्ठे रण्ये
ऽग्नौ देशे एवं होमार्थद्रव्यं आचार्याय दक्षिणास्व कौपीनादिकं.

त्रिवर्णंकृत्वा वैणवं दंडं यथोक्तं यथासंकेतं ॥ षड्भिः सुदर्शनं चक्रं ना
४ रायणमथाष्टभिः ॥ गोपालं दशभिर्युक्तं द्विषड्भिर्वासुदेवकं ॥ च
(5) तुर्दशात्मनंतं च अत ऊर्ध्वं न कारयेत् ॥ समुद्रकं संस्थाप्य कर्म कुर्वी
त दंडसंस्कारः ॥ अष्टोत्तरशतं शंखोदकेनाभिषेकं कृत्वा प्रणवेन
पुरुषसूक्तेन च ततः संकर्षण क्रमेण आचम्य प्राणायामं कृत्वा इति ॥
ॐ नमो ब्रह्मणे इति त्रिवारं जपित्वा वेदादिं च जपित्वा ॥ अथ सक्तुमु
ष्टित्रयं गायत्र्याभिमंत्र्य प्राश्याचम्य नाभिमभिमंत्रयेत् ॥ ॐ अं
अं२ आत्मने स्वाहा ॥ ॐ अंतरात्मने स्वाहा ॥ ॐ परमात्मने स्वाहा ॥ ॐ ४
प्रजापतये स्वाहा ॥ तत्र पयो दधि घृतं सर्पिरेकं जपेत् ॥ ॐ भूः सावित्री ५२
x सर्पिरिति त्रिवृत्सत्प्रणवेनाभिमंत्र्य प्राश्याचम्योपविश्य ॥ प्राणायामं सहस्रैकं जपेत् ॥ x१

(5A)

प्रविशामि॥ॐ तत्सवितुर्वरेण्यं॥ॐ भुवः सावित्रीं प्रविशामि॥ॐ भ
र्गो देवस्य धीमहि॥ॐ स्वः सावित्रीं प्रविशामि॥धियो यो नः प्रचोद
यात्॥ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि॥ॐ तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि धियो यो नः प्रचोदयात्॥ग्रामांते ग्रामसीमांते अग्न्या
गारे सुरायतने आज्यपयोदधि इदं सेतत्॥त्रिवच्चूलाप्रात्र्योपवसादि
त्युक्त्वं॥अथ पुरादिस्यात्स्तमावा सुचगल्सोक्त प्रकारेण विधिवदग्निं प्रति
ष्ठाप्येति॥आज्यं विलाप्योत्स्याखीक्ष्य स्रुवं चतुर्भिः स्रुवेण चतुर्गृहीत
माज्यं गृहीत्वा समिद्धेग्नौ पूर्णाहुतिं जुहुयात्॥ॐ भूः स्वाहेति ब्रह्म
न्वाध्यानमिति ज्ञातव्यं॥ततः स्वयमग्निकार्यं कृत्वा॥ॐ अग्नये स्वा
हा॥अग्नय इदं न मम॥ॐ भूः प्रजापतये स्वाहा॥प्रजापतय इदं न मम॥

अ०सं प०

पश्चादुत्तरेणाग्निं दर्भान्नास्तीर्य होमसाधनादिदंडादिपात्राण्यासा
५ दयित्वा दक्षिणे ब्रह्माणं संस्थापयेत्॥ कृष्णाजिनं चादाय तस्मि
न्चर्म आस्तीर्य तत्रोपविश्य तस्यां रात्रौ जागरणं कुर्यात्॥ ततः प्राणा
(6) यामं कृत्वा सायमग्निकार्यं विधाय व्याहृतीर्जपेत्॥ ततः पुरुषसू
क्तं जपेत्॥ आज्यहोमं कुर्यात् तद्यथा॥ ॐ इंद्राय स्वाहा॥ इंद्राय इ
दं न मम॥ प्रजापतये स्वाहा॥ प्रजापतय इ०॥ ॐ विश्वेभ्यो देवेभ्यः स्वा
हा॥ विश्वेभ्यो देवेभ्य इ०॥ ॐ ब्रह्मणे स्वाहा॥ ब्रह्मण इदं०॥ इति आ
हुति चतुष्टयं हुत्वा ब्राह्मणानाहूय पुण्याहवाचनं स्वस्त्यारवोक्तवि ५
•• धिना तस्मिन्नग्नौ चरुश्रपणं तु विद्धे वे [illegible] त्वा जुष्टं निर्वपामि॥

A joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ...

(6A)

विह्लवे लाज्जुष्टं प्रोक्षामीति पश्चाच्चरुहोमः ॥ ॐ प्राणाय स्वाहा ॥
ॐ अपानाय स्वाहा ॥ ॐ व्यानाय स्वाहा ॥ ॐ उदानाय स्वाहा ॥ ॐ
समानाय स्वाहा ॥ पुरुषसूक्तेन समिदन्नाज्याहुतीर्जुहुयात् ॥ तत
स्तस्मिन्नेवाग्नावाज्येन चरुणा च प्राणापानादिभिर्मंत्रैर्विरजाहो
मं कुर्यात् ॥ तद्यथा ॥ ॐ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ प्राणापानादिभ्य इदं० ॥ ॐ
वाङ्मनःश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः संकल्पा मे शुध्यं
तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ वागादिभ्य इदं० ॥ त्व
क्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यंतां ज्योतिर

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

हं० हा॥ त्वगादिभ्य इदं०॥ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नो
५ पस्थपायवो मे शुध्यंतां ज्योति० हा॥ शिरादिभ्य इदं०॥ उत्तिष्ठपुरुषह
रितपिंगललोहिताक्षिदेहि देहिददापयिता मे शुध्यंतां ज्योतिः० हा॥
(७) उत्तिष्ठा इदं०॥ पृथिव्यापस्तेजोवायुराकाशा मे शुध्यंतां ज्यो०॥
पृथिव्यादिभ्यः०॥ शब्दस्पर्शरूपरसगंधा मे शुध्यंतां ज्यो० हा॥
शब्दादिभ्य इ०॥ ॐ मनोवाक्कायकर्माणि मे शुध्यंतां ज्यो० हा॥
मन आदिभ्य इ०॥ ॐ अव्यक्तभावैरहंकारैर्ज्योतिः० हा॥ अव्यक्ता
दिभ्य इ०॥ आत्मा मे शुध्यंतां ज्यो० हा॥ आत्मन इ०॥ अंतरात्मा मे
शुध्यंतां ज्यो० हा॥ अंतरात्मन इ०॥ परमात्मा मे शुध्यंतां ज्यो० हा॥ ५
परमात्मन इ०॥ क्षुधे स्वाहा॥ क्षुध इ०॥ क्षुत्पिपासाय स्वाहा॥

(७A)

क्षुत्पिपासायइ०॥ विविद्द्यैस्वाहा॥ विविद्द्यैइ०॥ ऋग्विधानायस्वाहा॥
ऋग्विधानायेदं०॥ कषोत्कायस्वाहा॥ कषोत्कायइ०॥ क्षुत्पिपासामलं
ज्येष्ठामलक्ष्मीर्नाशयाम्यहं॥ अभूतिमसमृद्धिंचसर्वान्निर्णुदमेपा
नःस्वाहा॥ क्षुत्पिपासादिभ्यइदं०॥ अन्नमयप्राणमयमनोमयवि
ज्ञानमयमानंदमयमात्मामे शुध्यंतांज्यो०हा॥ अन्नमयादिभ्यइदं०॥
॥ इतिविरजाहोमंकृत्वा॥ ततः अग्नयेस्वाहा॥ अग्नयइ०॥ प्रजापतये
स्वाहा॥ प्रजापतयइ०॥ आत्मनेस्वाहा॥ आत्मनइ०॥ अंतरात्मनेस्वा
हा॥ अंतरात्मनइ०॥ ॐ परमात्मनेस्वाहा॥ परमात्मनइ०॥ ततःपुरुष
सूक्तेनप्रत्यृचंसमिद्भिराऽज्याहुतिभिर्जुहुयात्॥ पुरुषसूक्ते
नसर्वत्रत्यागंपुरुषायनारायणायेदं०॥ ततःपुरुषसूक्तंजपित्वा॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

७ यदिष्टं मन्त्रत्र प्रतं यद्रापाद्यं नापादि प्रजापतो तन्मन सिद्धुहोमि ॥ विमुक्तोहं
(8) देव किल्बिषात्स्वाहा ॥ प्रजापतिं मनसा ध्यायेन्प्रजापतये स्वाहेति ततो वे
दादीन्द्रजपित्वा स्विष्टकृतं जुहोति ॥ अग्नये स्विष्टकृते स्वाहेति ॥ ॥ अथ
स्वशाखिवआचार्याय वस्त्रं सुवर्णं धेनुं दक्षिणां च यथा संभवं दद्यात् ॥
आचार्यः क्षमाप्य प्रातरग्निकार्यं कृत्वोपस्थानं कुर्यात् ॥ समासिंचंतु म
रुतस्समिंद्रः संबृहस्पतिः ॥ समायमग्निः सिंचत्वायुषा च बलेन चायुष्मं
तं करोतु मां इत्युपस्थाय ॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः ॥
तं जानन्नग्न आरोहाथा नो वर्द्धया रयिं मंत्रेण ॥ या ते अग्ने यज्ञिया त
नूस्तया ह्यारोहात्मात्मानं ॥ अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि ॥ यज्ञो ७
भूत्वा यज्ञमासीद स्वां योनिं ॥ जातवेदो भुव आजायमानः सक्षेय एहि ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

त्रिरावृत्य हस्ताभ्यां गृहीत्वा अग्निज्वालां आघ्रापयेत् ॥ हस्तौ प्रक्षाल्य
चम्य ॥ ओं एह्यग्ने सहैष्टापूर्तैः शरीरमनुसंचरेत् ॥ अहं त्वामपहाय परां
गत्वा मामपहाय परां गां इत्यग्निं विसर्जयेत् ॥ ततः स्वेभ्यः पुत्रेभ्यः आ
शिषं दद्यात् ॥ सर्वे भवंतु वेदाढ्याः सर्वे भवंतु सोमपाः ॥ सर्वे पुत्रमु
खं दृष्ट्वा सर्वे भवंतु भिक्षुकाः ॥ पश्चात् योग्यं पुत्रं प्रति कथयति ॥ त्वं ब्र
ह्म त्वं यज्ञस्त्वं लोकस्त्वं सर्वं इति ॥ स पुत्रोपि तं प्रत्याह ॥ अहं ब्रह्म अहं
यज्ञः ॥ अहं लोकः सर्वं ज्ञायोग्यपुत्रे कश्ची दंडिभवति तर्हि अहं यज्ञ
इत्यादि स्वयमेव जपेत् ॥ शिवं स्वस्ति स्वस्ति सर्वेभ्यः ॥ अथ बंधुविस
र्जनं ॥ भवंतु सर्वे श्रीगुरुप्रसादात् संसारस्य पारमहं गंतुकामोस्मि
मया सर्वैषणाश्च पुत्रैषणा वित्तैषणा लोकैषणा यच्च सत्कायुष्मा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

भिर्ममोपरि ममतानकर्त्तव्या इत्यपां पूर्णांजलिभिः मंत्यः स्वाहे त्यभिमं
(१) त्र्य ॥ आशुः शिशान इत्यनुवाकेन ॥ ॐ सर्वेभ्यो देवेभ्यः स्वाहा ॥ ॐ
पां समीपे गत्वा तिथ्यादि स्मरण पूर्वकं स्नानं विधाय संध्यावंदनादि
कं कृत्वा [redacted] संन्यासं करोमीति संकल्प्य अपां पूर्णांजलिं गृहीत्वा ॥
ॐ एषह वाग्निः सूर्यः प्राणं गच्छ स्वाहे त्यंजलिं त्यजेत् ॐ योनिं गच्छ स्वा स्वाँ
हा ॥ ॐ यो वेग च्छ स्वाहे त्यंजलिं त्यजेत् उत्क्रेत्य पुत्रैषणा वित्तैषणा
लोकैषणा सर्वैषणा मया परित्यक्ता अभयं सर्वभूतेभ्यो मत्तः स
का शा स्वाहेति अपां पूर्णांजलिं जले प्रक्षिपेत् ॥ यत्किंचिद्बंधकं क
र्म कृतमज्ञानतो मया ॥ प्रमादालस्य दोषोत्थं तत्सर्वं संत्यजाम्यहं ॥१॥
संत्यक्तं सर्वविशुद्धात्मा गतस्नेह शुभाशुभे ॥ कामभोगादिकं सर्वं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

सत्कं चैवमुदाहरेत् ॥२॥ एवं सक्षाम्यहं सर्वं कामभोगसुखादिकं ॥
वेदांगानि विवादं च गंधमाल्या[illegible]नुलेपनं ॥३॥ भूषणं नर्त्तनं गे
यं दानमादानमेव च ॥ नमस्कारं जपं होमं याश्चनिस्याः क्रिया मम ॥४॥
नित्यं नैमित्तिकं काम्यं वर्णधर्माश्च माश्रये ॥ गुणधर्माश्च ये केचित्
शुभाशुभफलानि च ॥५॥ करणं कार्यकर्त्तत्वं कर्त्तारं करणै सह ॥
सर्वमेवपास्सऽस्य बुध्याधिष्ठितमानसः ॥६॥ आत्मानं सर्वभूतस्थं
सर्वभूतानि चात्मनि ॥ चतुर्विधस्य सन्नात्माभूतग्रामस्य नित्य
हः ॥७॥ कृतं च कायिकं चैव ईप्सितं चानुमोदितं ॥ सचिंत्स्य सर्वभू
तेभ्यो दद्यादभयदक्षिणां ॥८॥ पद्भ्यां कराभ्यां विहरन्नाहं वाक्को
यमानसैः ॥ करिष्ये प्राणिनां पीडा प्राणिनः संतु निर्भयाः ॥९॥ देहे

१ यत्नें बरे भूमौ स्थावरजंगमाश्रये ॥ पाषाण संपुटे येन भूरेषन्विश्चै
ष्ट काश्रये ॥१०॥ भावव स्यादि ध्यानेषु त्रायतं ध्यासनेषु ये ॥ तो स्त्व
य. तुं विबुध्यं तु सुरवं मतोभयंतथा ॥११॥ दत्ते वं सर्वभूतेभ्यो सर्व
त्राभयदक्षिणा ॥ करुणो मे त्र्यस्ति विश्व प्रज्ञा रत्निभ्न संस्थितः ॥१२॥
तत संचिन्तये द्धीमान् सर्वगात्मनि संस्थितः ॥ न कश्चिन्मे न कश्चाहं बुद्धि
रे कोहम च्युतः ॥१३॥ संसारादि सन्तो हं विच्छिन्वो देहमानसेः ॥ ब
सज्ञानां बुद्धी तेन सिंचमावाप्यवारणा ॥१४॥ न मेस्तु बंधिचवा के
चिन्मुक्तात्मा न परावराः ॥ ममात्मैव परो बंधु रूर्ध्वाधः पृष्ठतो यतः ॥१५॥
इंद्रियैर्विषयैः सर्वै मध्यायं तर्बहिस्थितः ॥ विश्वेश्वरो महात्मा वे सर्व १

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ..., Mumbai."

शोः सर्वतोमुखः ॥१६॥ सत्कभीरभयंदत्वा सर्वज्ञमेजमीश्वरं ॥ व्यक्ता
(10A) व्यक्तं परं शुद्धसत्वं निःश्वस्यतत्वतः ॥१७॥ एतान्मैषान्भुवनं शुद्धोदिरा
श्रेवावलोकयन् ॥ आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं
यमश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तिं ॥१८॥
तत्वोनाभिप्रमाणजलं प्रविश्य प्राङ्मुखः सन् ॥ ॥ ॐ भूः सावित्रीं प्र
विशामि ॥ तत्सवितुर्वरेण्यं ॥ ॐ भुवः सावित्रीं प्रविशामि ॥ भर्गो देवस्य
धीमहि ॥ ॐ स्वः सावित्रीं प्रविशामि ॥ धियो यो नः प्रचोदयात् ॥ ॐ
भूर्भुवः स्वः सावित्रीं प्रविशामि ॥ परोरजसे सावदों इति जपित्वा चम्य
प्रणवमयमात्मानं ध्यात्वा जलेस्थितः सन्पठेत् ॥ ॐ तत्सममंदीधाव

१० तिधारासु तस्यां च सः ॥ तरत्स मंदी धावति ॥ उस्त्रा वेद वसूनां मर्त्य
स्य देव्यवसः ॥ तरत्सं० ॥ ध्वस्त्रयोः पुरुषंत्योरा सहस्राणि दद्महे ॥ तर० ॥
(११) आ यद्योः त्रिंशतं तना सहस्राणि च दद्महे ॥ तर० ॥ इति पठेत् ॥ अथाद्भि
साभि मुखवस्त्रैश्छन्न् ॥ पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च
व्युत्थायाथ भिक्षाचर्यं चरामीत्युक्त्वा प्रैषोच्चारं कुर्यात् ॥ ॐ भूः संन्यस्तं मया ॥
ॐ भुवः संन्यस्तं मया ॥ ॐ स्वः संन्यस्तं मया ॥ ॐ भूर्भुवः स्वः संन्यस्तं
मया ॥ इति मंद्रमध्यमोच्चस्वरेणोक्त्वा ॥ ॐ अभयं सर्वभूतेभ्यो नमः ॥
स्वाहेति प्राच्यां दिशि अपां प्रपूर्णांजलिं प्रक्षिपेत् ॥ ततः सूक्ष्मां शिखा
र्थं स्थापितान् केशान् उत्पाट्य यज्ञोपवीते कंठादुद्धृत्य एकीकृत्य प्रक्षा १०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com